"भग्नं समासाद्विविधं हुताश !
काण्डे तु सन्धौ च हि तत्र सन्धौ ॥"
इति वैद्यकचक्रपाणिसंग्रहे भग्नाधिकारे ॥
हुताश इति अग्निवेशसम्बोधनं चरके हुताश-
शब्देनाग्निवेशोऽभिधीयते पदैकदेशे पदप्रवृत्तेः।
इति तट्टीकायां श्रीकण्ठदत्तः ॥ )
हुताशनः, पुं, ( हुतं आहुतद्रव्यं अशनमस्य । )
अग्निः । यथा, गोभिलपुत्त्रकृतगृह्यासंग्रहे ।
"लक्षहोमे तु वह्निः स्यात् कोटिहोमे हुताशनः ।
पूर्णाहुत्यां मृडो नाम शान्तिके वरदः सदा ॥"
इति तिथ्यादितत्त्वम् ॥
अपि च ।
"आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ज्ञानन्तु शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दनात् ॥"
इति गुणविष्णुधृतमत्स्यपुराणम् ।
शिवः । इति केचित् ॥ ( वटिकौषधविशेषः । )
तद्यथा,—
"एकद्विकद्वादशभागयुक्तं
योज्यं विषं टङ्कणमूषणञ्च ।
हुताशनो नाम हुताशनस्य
करोति वृद्धिं कफजिन्नराणाम् ॥"
इति हुताशनो रसः ॥ *
इति वैद्यकरसेन्द्रसारसंग्रहेऽजीर्णाद्यधिकारे ॥)
हुतिः, स्त्री, हवनम् । हुधातोः क्तिप्रत्ययेन
निष्पन्ना ॥
हुम्, व्य, (हूयते इति । हु + बाहुलकात् मः । )
स्मृतिः । अपाकृतिः । अर्थप्रश्नः । अभ्यनुज्ञा ।
इति मेदिनी ॥ तर्के वितर्के हूँ शब्दो दीर्घादि-
ऋक्षादिरपीति केचित् । इत्यमरटीकायां
भरतः ॥
हुर्च्छ, श्रा कौटिल्यके । इति कविकल्पद्रुमः ॥
( भ्वा०-पर०-अक०-सेट् । ) ह्रस्वी । क्विपि
राल्लोपीति ह्रुः हुरौ हुरः । श्रा हूर्च्छितं हूर्णं
तेन । हुर्च्छति खलः कुटिलः स्यादित्यर्थः ।
हुर्च्छति चौरः अपसरतीत्यर्थः । इति धातु-
प्रदीपः । इति दुर्गादासः ॥
हुल, ज, हतिसम्वरणयोः । इति कविकल्पद्रुमः ॥
( भ्वा०-पर०-सक०-सेट् । ) ज, होलः हुलः ।
इति दुर्गादासः ॥
हुलहुली, स्त्री, ( हुल + क । आभीक्ष्ण्ये द्वित्वं
गौरादित्वात् ङीष् । ) स्त्रीणां मङ्गलजनक-
मुखशब्दः । उलु उलु इति भाषा । तत्पर्य्यायः ।
सुखनृष्टा २ । इति त्रिकाण्डशेषः ॥
हुहुः, } पुं, (आह्वयतीति । ह्वे + निपातनात्
हूहूः, } डुः डूश्च । ) गन्धर्व्वविशेषः । यथा,—
"हाहाहूहूश्च द्विविधौ हुहुर्हूहुश्च कुत्रचित् ।"
इति शब्दरत्नावली ॥
( यथा, महाभारते । १३ । ८३ । ८ ।
"पर्य्यपासन्त कौरव्य ! कदाचिद्वै पितामहम् ।
नारदः पर्व्वतश्चैव विश्वावसुर्हहा हुहुः ॥" )
हू, व्य, ( ह्वे + डूः । निपातनम् । ) आह्वानम् ।
यन्त्रणा । अहङ्कारः । शोकः । इति केचित् ॥

हूँ, व्य, मन्त्रविशेषः । तदुद्धारपर्य्यायो यथा,—
"हकारो वामकर्णाढ्यो नादबिन्दुविभूषितः ।
कूर्च्चं क्रोध उग्रदर्पौ दीर्घहुङ्कार उच्यते ।
शब्दश्च दीर्घकवचं ताराप्रणव इत्यपि ॥"
किञ्च ।
"शिखावषट् च कवचं क्रोधो वर्म्म हमित्यपि ।
क्रोधाख्यो हूं तनुत्रञ्च शस्त्रादी रिपुसंज्ञकः ॥"
अपि च ।
"व्योमस्थं तालजङ्घाख्यं नादबिन्दुविभूषितम् ।
कूर्च्चं कालो महाकालः क्रोधबीजं निरञ्जनम् ॥"
इति नानातन्त्रम् ॥
हूङ्कारः, पुं, ( हूम् + कृ + भावे घञ् । ) हूमिति
भयानकध्वनिः । यथा,—
"इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।
हूङ्कारेणैव तं भस्म सा चकाराम्बिका ततः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥
हूड, ऋ ङ गतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-
आत्म०-सक०-सेट् । ) ऋ, अजुहूडत् । ङ,
हूडते । इति दुर्गादासः ॥
हूतं, त्रि, ( ह्वे + क्त । ) आहूतम् । आह्वानी-
कृतम् । ह्वे ज धातोः क्तप्रत्ययेन निष्पन्नम् ॥
हूतिः, स्त्री, ( ह्वे + क्तिन् + सम्प्रसारणम् । )
आह्वानम् । इत्यमरः । १ । ६ । ८ ।
हूनः, पुं, ( ह्वे + नक् सम्प्रसारणञ्च । ) म्लेच्छ-
जातिविशेषः । यथा,—
"श्वपाकश्च तुरुष्कश्च हूनो यवन इत्यपि ।
लोकबाह्यस्तु यो वाजिगवाशाचारवर्ज्जितः ।
म्लेच्छः किरातशवरपुलिन्दाद्यास्तु तद्भिदा ॥"
इति जटाधरः ॥
मादराजदेशीयस्वर्णमुद्राविशेषश्च ॥
हूम्, व्य, हूयते इति । बाहुलकात् मः । प्रश्नः ।
वितर्कः । इत्यमरः । ३ । ४ । १८ ॥ सम्मतिः ।
क्रोधः । भयम् । निन्दा । अवज्ञा । इत्यमर-
टीकायां नारायणचक्रवर्त्ती ॥ वितर्के हूं
चेतोऽपि पण्डितः । प्रश्ने हूं को लङ्काधिपतिः ।
अनुमतौ च हूं कृतं हूम् । भये च हूं न
गन्तव्यम् । इत्यमरटीकायां भरतः ॥ अन्यत्
हुँशब्दे द्रष्टव्यम् ॥
हूरवः, पुं, ( हू इति रवोऽस्य । ) शृगालः । इति
हेमचन्द्रः ॥
हूर्च्छनं, क्ली, ( हूर्च्छ + भावे ल्युट् । ) कौटिल्यम् ।
इति केचित् ॥
हूहुः, } पुं, ( आह्वयतीति । ह्वे स्पर्द्धायाम् ।
हूहूः, } क्विप् । सम्प्रसारणम् । आभीक्ष्ण्ये द्वित्वं
निपातनात् ह्रस्वः । पक्षे तु न । ) गन्धर्व्वविशेषः ।
इति शब्दरत्नावली ॥ ( यथा, भागवते । ८।४।३।
"योऽसौ ग्राहः स वै सद्यः परमाश्चर्य्यरूपधृक् ।
मुक्तो देवलशापेन हूहूर्गन्धर्व्वसत्तमः ॥" )
हृ, ञ हृत्याम् । इति कविकल्पद्रुमः ॥ ( भ्वा०-
उभ०-द्विक०-अनिट् । ) हृतिर्देशाद्देशान्तर-
प्रापणा । ञ, हरति हरते गां वनं गोपः ।
इति दुर्गादासः ॥

हृ, लि र प्रसह्यकृत्याम् । इति कविकल्पद्रुमः ॥
( जु०-पर०-सक०-अनिट् । ) प्रसह्यकृतिर्बलात्-
कारः । लि, जहर्त्ति धनं दस्युः । र वैदिकः ।
इति दुर्गादासः ॥
हृच्छयः, पुं, ( हृदि शेते इति । शी + "अधि-
करणे शेतेः ।" ३ । २ । १५ । इति अच् । )
कामदेवः । इति हलायुधः ॥ ( यथा, महा-
भारते । ३ । ४६ । ४२ ।
"तत् प्रसीद न मामार्त्तां विसर्ज्जयितुमर्हसि ।
हृच्छयेन च सन्तप्तां भक्ताञ्च भज मानद ! ॥")
हृदयशायिनि, त्रि ॥ (यथा, महाभारते । १३ ।
८५ । १७ ।
"जगत्पतिरनिर्द्देश्यः सर्व्वगः सर्व्वभावनः ।
हृच्छयः सर्व्वभूतानां ज्येष्ठो रुद्रादपि प्रभुः ॥"
पुं, कामः । यथा, भागवते । १ । ६ । ७ ।
"सकृद्यद्दर्शितं रूपमेतत् कामाय तेऽनघ ! ।
मत्कामः शनकैः साधुः सर्व्वान् मुञ्चति
हृच्छयान् ॥"
"हृच्छयान् कामान् ।" इति तट्टीकायां श्रीधरः ॥)
हृच्छूलं, क्ली, ( हृदयजातं शूलमिति मध्यलोपी
समासः । ) हृदयजातशूलरोगः । तदौषधं
यथा, गारुड़े १९८ अध्याये ।
"क्वथितोदकपानन्तु शम्बूका चारकं तथा ।
मृगशृङ्गं ह्यग्निदग्धं गव्याज्येन समन्वितम् ।
पीतं हृत्पृष्ठशूलानां भवेन्नाशकरं शिव ! ॥"
अपि च ।
"बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम् ।
प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ॥
बलाचातिबला रास्ना श्वदंष्ट्रा च पुनर्नवा ।
एरण्डशारिवा पर्णी गुडूची कपिकच्छुरा ॥
एषां दश पलिकान् भागान् क्वाथयेत् सलिले-
ऽमले ।
तेन पादावशेषेण तैलं पात्रे विपाचयेत् ॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् ॥
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि तत्
शृणु ॥
शतपुष्पा देवदारु शालपर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ॥
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ।
अपस्मारं वातरक्तमायुष्मांश्च पुमान् भवेत् ॥"
इति च गारुड़े १९८ अध्यायः ॥
हृणिया, स्त्री, ( हृणीयते इति । हृणीङ् +
कण्ड्वादित्वात् यक् । ततः अः । निपातनात्
ह्रस्वः । ) हृणीया । इत्यमरटीकायां राय-
मुकुटः । ३ । २ । ३२ ॥
हृणीया, स्त्री, ( हृणीङ् + कण्ड्वादित्वात् यक् ।
अः । ) निन्दा । इत्यमरः । ३ । २ । ३२ ।
हृत्, [द्] क्ली, (हरति ह्रियते वेति । हृ + "हृञोः
सुक् दुक् चेति ।" उणा० ४।१००। इतिबाहुल-
कात् केवलादपि दुक् । ) हृदयम् । तत्पर्य्यायः ।